International Journal of Sanskrit Research 2018; 4(6): 67-68

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(6): 67-68
© 2018 IJSR
www.anantaajournal.com
Received: 12-09-2018
Accepted: 13-10-2018

**किरण खींची**
राष्ट्रिय संस्कृत संस्थानम्, जयपुर परिसरः, जयपुरम्, राजस्थान, भारत

**Correspondence**
**किरण खींची**
राष्ट्रिय संस्कृत संस्थानम्, जयपुर परिसरः, जयपुरम्, राजस्थान, भारत

# वाञ्छाभट्टकृतायाः वैयाकरणसिद्धान्तकौमुदीटीकायाः शाब्दिकलीलावत्याः परिचयः, शाब्दिकलीलावत्यनुसारं धातूनामर्थाः

**किरण खींची**

## प्रस्तावना

''कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः'' ।।

इति सूक्तिः प्रचलिता संस्कृतजगति सिद्धान्तकौमुद्याः महत्त्वगानस्य। वैयाकरणसिद्धान्तकौमुदी पाणिनीयव्याकरणे प्रवेशाय
प्रथमसोपानत्वेन सवैराद्रियतङ्ग आश्रीयते च। सुधिया भट्टोजिदीक्षितेन समेषां विदुषां सिद्धान्तप्रकाशिका वैयाकरणसिद्धान्तकौमुदी विरचिता। दीक्षितमहोदयेनाष्टाध्याय्याः प्रक्रियाक्रमविकासे अष्टाध्यायीस्थसूत्राणि प्रक्रिया–शब्दरूपसाधनदृष्ट्या पृथक्कृत्य विविधप्रकारेषु व्याख्यातानि सन्ति। अस्याः वैयाकरणसिद्धान्तकौमुद्याः नैकाः टीकाः उपलभ्यन्ते। तासु प्रौढमनोरमा–तत्त्वबोधिनी–बालमनोरमा–बृहच्छब्देन्दुशेखर–लघुशब्देन्दुशेखरादिटीकाः एतावत् महत्त्वं भजन्ते यत् एताः सर्वाः स्वतन्त्रग्रन्थरूपेण पठ्यन्ते कण्ठस्थीक्रियन्ते च। एताः टीकाः अतिरिच्य एका अन्यापि प्रौढा अत्यधिकं गभीरा महत्त्वपूर्णा च टीका लभ्यते। यस्याः नाम शाब्दिकलीलावती वर्तते। टीकेयं नागेशभट्टस्य पूर्वकालिकेन वाञ्छाभट्टमहोदयेन व्यरचि। अस्याः टीकायाः एक एव हस्तलेखः अधुना प्राप्तः यः राजस्थानराज्ये बीकानेरनगरे अनूपसंस्कृतपुस्तकालये सुरक्षितः वर्तते। टीकेयं काशीस्थेन वाञ्छाभट्टमहोदयेन नागेशभट्टादपि प्राग्लिखिता। 'संस्कृत व्याकरणशास्त्र का इतिहास' ग्रन्थस्य कर्तुः युधिष्ठिरमीमांसकमहोदयस्य अनुसारं नागेशभट्टस्य समयः वि.सं. (1730–1820) मध्ये निर्धारितं वर्तते प्रत्युत वाञ्छाभट्टमहोदयेन टीकेयं वि.सं. 1725 तमे (ई.वर्षे.1668) विरचिता वर्तते। अस्यां टीकायां तिङन्तप्रकरणम् (उत्तरार्धम्) एव प्राप्तमस्ति तथापि महत्तरोऽयं खण्डः। विस्तृता चेयं टीका, अस्याः लेखनपद्धतिरपि अत्युत्कृष्टा वर्तते।
अस्याः शाब्दिकलीलावतीटीकायाः यदा अध्ययनमनुशीलनं सूक्ष्मावलोकनादिकं क्रियते तदा अस्याः कानिचन वैशिष्ट्यानि दृष्टिपथमायान्ति यदन्यत्र नगण्याः सन्ति। सारगर्भिता एषा व्याख्या मौलिकचिन्तनपुरस्सरं सूत्रव्याख्यानं प्रस्तौति। एतासु विशिष्टतासु , अस्याः 'धातूनामर्थप्रतिपादनं' प्रमुखं वर्तते। टीकायामस्यां व्याख्याकर्त्रा सायासेन धातूनामर्थाः विलिखिताः सन्ति। धात्वर्थविषये मूले भट्टोजिदीक्षितेन यत्किञ्चिदुक्तं तस्य सरलं व्याख्यानं लौकिक–शास्त्रादिप्रयोगानुसारं च धात्वर्थप्रतिपादनं दृश्यते अस्यां टीकायाम्। तथाहि–

1. ष्टै(922)। वेष्टने इति मूले लिखितम् [1]।
   शाब्दिकलीलावत्यनुसारम् ष्टै सकर्मकः। रूद्रे स्तायूनां पतये नम इति। ये वेष्टयित्वा कुर्वन्ति ते स्तायवः। छद्मकर्तार इत्यर्थः। भारते च। पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्त्या जघघनम्। याः स्त्रियो दृष्टवत्यः स्ताः पुम्भावं मनसा ययुरिति। स्नायन्त्या वेष्टयन्त्या इत्यर्थ इति।
2. यज (1002)। देवपूजासङ्गतिकरणदानेषु इति मूले [2]। "देवोद्देशेन विधिबोधितो द्रव्यत्याग इह पूजा। न तु पूजासामान्यम्। अतः पूजयत्योर्न पर्यायत्वम्। अत एव गुरूं यजतीति न प्रयोगः" इति शाब्दिकलीलावती।
3. टुओ श्वि (1010)। गतिवृद्ध्योः इति मूले [3]। शाब्दिकलीलावत्यनुसार तु ''नात्रैधति वृद्धिसामान्यमर्थः। किन्तु विकारेण जाता वृद्धिः। उच्छूनश्चैत्र इत्यादिप्रयोगस्य तत्रैव दर्शनात्'' इति।
4. अद् (1011) भक्षणे इति मूले लिखितम् [4]। स्वगलाधोगमनानुकूलो व्यापारो भक्षणम् इति शाब्दिकलीलावतीमतम् ।

5. द्विष (1013)। अप्रीतौ इति मूले [5]। तथाहि शाब्दिकलीलावत्याम्– इह धातोरर्थो न तु प्रीत्यभावः किन्त्वात्मगुणो द्वेषः। तेन तस्य सविषयकत्वात्सकर्मकत्वं युज्यते। शत्रुं द्वेष्टीति।
6. चक्षिङ् (1017)। व्यक्तायां वाचि। अयं दर्शनेऽपीति मूले लिखितम् [6]। अत्र वाञ्छाभट्टमहोदयो ब्रवीति 'दर्शनेऽपीति। विश्वा रूपा अभिचष्टे शचीभिरित्यत्र दर्शनार्थत्वेन व्याख्यातत्वात्' इति।

एवं प्रकारेण अनेकस्थलेषु अनेन व्याख्याकर्त्रा धातूनां व्यावहारिकार्थः स्पष्टीकृतः पुनश्च मूले विलिखितस्य धातोरर्थस्य शास्त्रोदाहरणेन समर्थनं कृतम्।

**संदर्भ ग्रंथ सूची**


1. वैयाकरणसिद्धान्तकौमुदी – सं. गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द शर्मा विद्याभास्करः पृ॰ सं.॰२१३, मोतीलाल बनारसीदास संस्करण दिल्ली सन् २००५
2. वैयाकरणसिद्धान्तकौमुदी – सं. गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द शर्मा विद्याभास्करः पृ॰ सं.॰२४५, मोतीलाल बनारसीदास संस्करण दिल्ली सन् २००५
3. वैयाकरणसिद्धान्तकौमुदी – सं. गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द शर्मा विद्याभास्करः पृ॰ सं.॰२५४, मोतीलाल बनारसीदास संस्करण दिल्ली सन् २००५
4. वैयाकरणसिद्धान्तकौमुदी – सं. गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द शर्मा विद्याभास्करः पृ॰ सं.॰२५७, मोतीलाल बनारसीदास संस्करण दिल्ली सन् २००५
5. वैयाकरणसिद्धान्तकौमुदी – सं. गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द शर्मा विद्याभास्करः पृ॰ सं.॰२६२, मोतीलाल बनारसीदास संस्करण दिल्ली सन् २००५
6. वैयाकरणसिद्धान्तकौमुदी – सं. गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द शर्मा विद्याभास्करः पृ॰ सं.॰२६४, मोतीलाल बनारसीदास संस्करण दिल्ली सन् २००५